भवति । अथवेष्टघटिकोनाभिः षष्टिघटिकाभिरस्त लग्नात् क्रमेण लग्नं साधितं तद्भदलोनितमस्तसूर्य्यो भवति यदोदयभानुसमो भानुर्भवति तदा तस्य नक्षत्रस्योदयो भवति । यदास्तसूर्य्यसमस्तदास्तमयः । यदागस्त्योदयः किलाभीष्टदिनात् कियद्भिर्दिनैरिति विज्ञातुमिष्यते तदेष्टदिनार्कस्यागस्त्योदयार्कस्य चान्तरकला रविभुक्त्या भाज्याः । लब्धदिनैरगस्त्यस्योदय एष्यः यद्युदयार्को महान् । यद्यूनस्तदा गतः । अत्रोपपत्तिः उदयास्तलग्नसाधने तु पूर्व्वं कथितैव । उदयलग्नोदये किल भस्योदयः यदोदयलग्नसमो रविर्भवति तदा रविणा सह तन्नक्षत्रमुदेति । तस्मादुदयात् प्राक् पठितेष्टघटिकातुल्यं कालं यावत् तन्नक्षत्रं रविप्रभाभिर्हृतं क्षितिजादुपरिस्थमपि न दृश्यते । अथ पठितेष्टकाले यत् [illegible]लग्नं तत्स्थानस्थितो रविरुदयार्कतुल्यो भवति तथा रव्यस्तमयादनन्तरं नक्षत्रास्तमयात् पूर्व्वं प्रत्यक् क्षितिजादुपरिस्थमपि नक्षत्रं पठितेष्टकालं यावन्न दृश्यते । अथ नक्षत्रस्य क्षितिजादुपरिस्थितत्वात् प्रत्यक्क्षितिजस्थेनार्केण न्यूनेन भवितव्यम् । अतोऽस्तलग्नात् पठितेष्टकाले व्यस्तं कार्य्यम् । तल्लग्नं प्राक्क्षितिजस्थं भवति । अतः षड्भोनितं प्रत्यक्क्षितिजेऽस्तसूर्य्यो भवतीत्युपपन्नम् । इष्टोनषष्टि ६०घटिकाभिरित्यादौ वासना सुगमैव । यस्य नक्षत्रस्योदस्तार्कादस्तार्कोऽधिको भवति तस्य नक्षत्रस्यार्कसान्निध्यवशादस्तं नास्तीति वेदितव्यम् । इदं कुत इत्यत आह सौम्यशरातिदैर्घ्यात् । यस्य भस्य सौम्यः शरो दीर्घो भवति तस्य पलोद्भवासवो बहवो भवन्ति ॥ तैर्विलोमलग्ने क्रियमाणे उदयलग्नमूनं भवति । अस्तलग्नं क्रियमाणमधिकं भवति । ताभ्यां हुग्रदयास्तार्कौ साध्यौ । तत्रास्तार्केण किल न्यूनेन भवितव्यम् । अस्तार्कसमे रवौ किलादृश्यतारम्भस्ततः कियन्ति च दिनान्यदृश्यं भूत्वोदयार्कसमे रवौ तद्भिष्ण्यमुदेति । अत उदयार्केणाधिकेन भवितव्यम् । यतोऽर्कसन्निधिवशेनैतावुदयास्तौ । यथा यथा सौम्यशरस्य दीर्घत्वं यथा यथाक्षवशेन गोलस्य दक्षिणतो नामनं तथा तथोदयास्तार्कयोरल्पमन्तरं भवति । अल्पान्तरेऽल्पान्येव दिनानि तन्नक्षत्रमदृश्यं भवति । एवं यस्मिन् देशे उदयास्तार्कौ तुल्यौ भवतस्ततः परं तस्मिन् देशे तस्य नक्षत्रस्यार्कासन्नभावेनादृश्यता इति युक्तितः सिद्धम्” प्रमि० । अस्तलग्नसाधनमप्युक्तं तत्रैव “यत्र लग्नमपमण्डलं कुजे तद्गृहाद्यमिह लग्नमुच्यते । प्राचि । पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे” कुजे भूमिमण्डलगते रेखावृत्ते अपमण्डलं ततो निस्सरदनुमण्डलम् । ग्रहाणामुदयास्तांशानाह तत्रैव । “प्राच्यामुदेति क्षितिजोऽष्टदस्रैः २८ शक्रै १४ र्गुरुः सप्तकुभिश्च १७मन्दः । खखोदयान्तोनित ३६०चक्रभागै-२२२ । ३४६ । ३४३ । स्त्रयो व्रजन्त्यस्तमयं प्रतीच्याम् । खाक्षै ५० र्जिनै २४ र्ज्ञसितयोरुदयः प्रतीच्यामस्तञ्च पञ्चतिथिभि १५५ र्मुनिसप्तभूभिः १७७ । प्रागुद्गमः शरनखै २०५ स्त्रिधृतिप्रमाणै-१८३ रस्तश्च तत्र दशवह्निभि ३१० रङ्गदेवैः ३३६ । अवक्रवक्रास्तमयोदयोक्तभागाधिकोनाः कलिका विभक्ताः । द्राक्केन्द्रभुक्त्याप्तदिनैर्गतैष्यैरवक्रवक्रास्तमयोदयाः स्युः” । “बाले वा यदि वा वृद्धे शुक्रे चास्तमुपागते । मलमास इवैतानि वर्ज्जयेद्देवदर्शनम् । पक्षं वृद्धस्तु पूर्व्वेण दशाहं पश्चिमेन तु । प्रत्यग्बालो दशाहन्तु पूर्व्वेण च दिनत्रयम्” ज्यो०त० पूर्व्वेणेति प्रातःप्रातः पूर्व्वदिशि दृष्टा रविकिरणाच्छन्नतया न दृश्यते चेद्ग्रहस्तदा प्रागस्तमितः तत्रास्तमितात् प्राक् पक्षं वृद्धः । पश्चिमेनेति । एवं सायंसायं अपरदिशि दृष्टा रविकिरणाच्छन्नतया न दृश्यते चेद्ग्रहस्तदा प्रत्यगस्तमितस्तत्रास्तमितात् प्राक् दशाहं वृद्धः” । “द्वात्रिंशद्दिवसाश्चास्ते जीवस्य भार्गवस्य च । द्वासप्ततिर्महत्यस्ते पादास्ते द्वादश क्रमात्” । इति ज्योतिर्विदुक्तकालानन्तरमपरदिशि दृश्यते चेत्तदा दशाहं प्रत्यग्बालः पूर्व्वदिशि चेत्तदा दिनत्रयं प्राग्बाल इति भङ्ग्यन्तरेणाह । “पक्षं वृद्धो महास्ते तु बालश्चात्र दशाह्निकः । पादास्ते तु दशाहानि वृद्धो बालो दिनत्रयम्” इति च ज्यो०त०रघु० ।

**अस्तक** पु० अस्तं अपुनरावृत्तिम् अवसानं वा करोति अस्त+णिच्-ण्वुल् । निर्व्वाणमोक्षे ।

**अस्तग** त्रि० अस्तमदर्शनं गच्छति गम—ड ६त० । १ सूर्य्यकिरणाच्छन्नतया अदृश्ये ग्रहे २अदर्शनगतमात्रे च । अस्तगतादयोऽप्यत्र ।

**अस्तगमन** न० अस्तस्यादर्शनस्य गमनम् । ग्रहाणां स्वाक्रान्तराश्यपेक्षया सप्तमराश्युदये अदर्शनगमने “भीमसेनं भजेयास्त्वं प्रागस्तगमनाद्रवेः” भा०आ०प० १५५अ० ।

**अस्तम्** अव्य० अस—तमि । १नाशे, २अदर्शने च । “दण्डेनास्तमितत्विषा” कुमा० । “राज्यमस्तमिरेश्वरम्” रघुः । “सर्व्वञ्च तिलसंबन्धं नाद्यादस्तमिते रवौ” । “नेक्षेतोद्यन्तमादित्यं नास्तंयान्तं कदाचन” चतुरोऽस्तमिते सूर्य्ये